श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्रीनिवासरामानुजमहादेशिकैः (मैसूर आण्डवन्)
संस्कृतभाषायां अनुवाद्य अनुगृहीतं
श्रीमद्वेदान्ताचार्यविरचितम्

# ॥ चरमश्लोकच्चुरुक्कु ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ चरमश्लोकच्चुरुक्कु ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥

सम्यक्ज्ञानेन हीना यदिह च विजहुः कर्मयोगादिकांश्च
तेष्वप्यन्यास्ववस्थास्वनुगुणविधिनोपात्तसर्वक्रियासु।
सम्यक्ज्ञानाः प्रवृत्तास्स्युरपि तदवला मां ह्युपायं न्यसेयुः
एवं सर्वांश्च धर्मान् उपदिशत उपाशिश्रयामोऽङ्घ्रियुग्मम् ॥ **1** ॥

आकिञ्चन्यं विदित्वा तदनु तदु पुरस्कृत्य चान्याः प्रतीकाः
नापेक्ष्या इत्यवेत्योन्नतफल मिव तत् प्राप्तु मुत्पत्य खर्वः।
खिन्नस्सन्त्यज्य तच्चाप्यतिदृढचतुरास्यास्त्ररीतिं च बुध्वा
न्यस्तव्यं चैकधर्मायनमतिशयितः प्राह धर्मस्तदानीम् ॥ **2** ॥

त्यक्त्वा क्षीरपयोनिधिं च मधुरां लक्ष्म्या सहागत्य तं
भूभारं त्ववतार्य भारतरणे भूत्वा च सूतः पुरा।
दूतोऽतीवभयार्तफल्गुनरथात् यस्तं ररक्ष स्वयम्
तस्यैतस्य हरेः पदाम्बुजमहादासा वयं स्मोऽधुना ॥ **3** ॥

लभ्यं साधन मात्मनीनकृपया तत् साधकश्च स्वयं
प्राप्नोतीत्यपनेतु माश्रितजनैकोपायभूतं हरिम्।
अत्यन्तस्पृहणीयया करुणया लक्ष्म्या च साकं स्तुतं
रस्योक्तिं प्रभुमभ्युपेयित परं चेहैकवाच्यं वयम् ॥ **4** ॥

देहे संयोज्य संभ्रामयति च दुरिताम्भोनिधौ मां निमग्नं
    शेषत्वादीन् मदीयान् अपिच शुभगुणान् स्वानुरूपं सुमार्गम्।
कारुण्यब्धिस्स्वयं मे स्वमिह वितरितुं धर्म एवाद्वितीयः
    नान्यं लप्स्ये यथेतः पर मिह परमं मय्यभिस्निह्यतीशः ॥ 5 ॥

कर्मस्वत्यन्तकृच्छ्रेष्विह पुरुषफलावाप्तिविघ्नायितेषु
    स्वीकृत्याचार मस्मास्वविरत मिह तत्पूर्णविश्वासयुक्तः।
वस्त्वेतत्स्वैकरक्ष्यं न्यसनकरणतश्चैकदैवाहिहृष्तः
    गीताचार्यो व्रजेति श्रित मुवद तदाऽलम्भयच्चात्मपादौ ॥ 6 ॥

वेद्यो दुर्ज्ञेयवेदैः पर इति सकलात् यस्स्वयं चाधुना स्वं
    मर्त्याकारं य एवं न विदुरिह तदावेदनात्तप्रभावः।
सार्धं तैर्नित्यसङ्घैस्त्ववतरति जगत्युत्तमः पूरुषोऽहं
    शब्दार्थः श्रीप्रियोऽस्मान् निजपरमपदं प्रापयत्येव भक्तान् ॥ 7 ॥

आत्मीयां दर्शयित्वा स्तिथि मतिमुदितश्वासहायान् विलोक्य
    ता मस्माकं ह्यपोढुं स्तिथि मिह परिगृह्यात्मरक्ष्यान् प्रपन्नान्।
आत्माङ्घ्री एवदातुं विविधगतियुते मूलवर्णे शताङ्गे
    पार्थस्याप्यास्थितोऽस्मान् उपकृदुपगतान् स्वीचकाराद्यधर्मान् ॥ 8 ॥

पादाभ्यां च तदा जघान शकटं यश्चाभवत्सारथिः
    चक्रे न्यस्तभरांश्च नो विघटकन्यास्माकमेनांसि च।
आरण्यान्युत नारकानुत महाक्ष्वेडौघमाहोऽनलं
    सोऽर्णं वा दुरपोढगाढतिमिरां रात्रिं समीयुर्ध्रुवम् ॥ 9 ॥

संन्यस्तात्मीयभारात् परमिह जनितैनांसितो मोचयित्वा
    पद्धत्यारऽचिः प्रभृत्या परमपद मसौ प्रापयन् मोदमानैः।
तत्रत्यैः नित्यमुक्तैः रमयितु मनिशं त्वद्य चेदद्य एव
    श्वश्चेत् श्वश्चैव संकल्पत उरुकरुणो मोक्षयन् त्रायते नः ॥ 10 ॥

स्वीकुर्वन् नः प्रपन्नान् धुतसकलमतीन् आत्मसंरक्षणीयान्
बन्धूक्त्यर्हान् समस्तान् स्वयमिह विधरन्नस्मदर्थं हि भूत्वा।
दुःखं माभूत् पुनर्भूकृत मिति हृदयं चाजहत्संवसंश्च
स्वामी सर्वाणि दुःखान्यतिशयकृपया भोग्ययाऽनाशयन्नः॥ **11** ॥

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीदेशिकप्रबन्धस्थः चरमश्लोकसङ्ग्रहः।
सश्लोकस्सार्थतात्पर्यः कृतो गोपालसूरिणा॥

॥ इति चरमश्लोकसङ्ग्रहः समाप्तः॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥